श्री शिव केशादिपादांतवर्णन स्तोत्रं

श्री शिव केशादिपादांतवर्णन स्तोत्रं

देयासुर्मूर्ध्नि राजत्सरससुरसरित्पारपर्यंतनिर्य-
-त्प्रांशुस्तंबाः पिशंगास्तुलितपरिणतारक्तशालीलता वः |
दुर्वारापत्तिगर्तश्रितनिखिलजनोत्तारणे रज्जुभूता
घोराघोर्वीरुहालीदहनशिखिशिखाः शर्म शार्वाः कपर्दाः || 1 ||

कुर्वन्निर्वाणमार्गप्रगमपरिलसद्रूप्यसोपानशंकां
शक्रारीणां पुराणां त्रयविजयकृतस्पष्टरेखायमाणं |
अव्यादव्याजमुच्चैरलिकहिमधराधित्यकांतस्त्रिधोद्य-
-ज्जाह्नव्याभं मृडानीकमितुरुडुपरुक्पांडरं वस्त्रिपुंड्रं || 2 ||

क्रुध्यद्गौरीप्रसादानतिसमयपदांगुष्ठसंक्रांतलाक्षा-
-बिंदुस्पर्धि स्मरारेः स्फटिकमणिदृषन्मग्नमाणिक्यशोभं |
मूर्ध्न्युद्यद्दिव्यसिंधोः पतितशफरिकाकारि वो मस्तकं स्ता-
-दस्तोकापत्तिकृत्यै हुतवहकणिकामोक्षरूक्षं सदाक्षि || 3 ||

भूत्यै दृग्भूतयोः स्याद्यदहिमहिमरुग्बिंबयोः स्निग्धवर्णो
दैत्यौघध्वंसशंसी स्फुट इव परिवेषावशेषो विभाति |
सर्गस्थित्यंतवृत्तिर्मयि समुपगतेतीव निर्वृत्तगर्वं
शर्वाणीभर्तुरुच्चैर्युगळमथ दधद्विभ्रमं तद्भ्रुवोर्वः || 4 ||

युग्मे रुक्माब्जपिंगे ग्रह इव पिहिते द्राग्ययोः प्राग्दुहित्रा
शैलस्य ध्वांतनीलांबररचितबृहत्कंचुकोऽभूत्प्रपंचः |
ते त्रैनेत्रे पवित्रे त्रिदशवरघटामित्रजैत्रोग्रशस्त्रे
नेत्रे नेत्रे भवेतां द्रुतमिह भवतामिंद्रियाश्वान्वियंतुं || 5 ||

चंडीवक्त्रार्पणेच्छोस्तदनु भगवतः पांडुरुक्पांडुगंड-
-प्रोद्यत्कंडूं विनेतुं वितनुत इव ये रत्नकोणैर्विघृष्टिं |
चंडार्चिर्मंडलाभे सततनतजनध्वांतखंडातिशौंडे
चांडीशे ते श्रियेस्तामधिकमवनताखंडले कुंडले वः || 6 ||

खट्वांगोदग्रपाणेः स्फुटविकटपुटो वक्त्ररंध्रप्रवेश-
-प्रेप्सूदंचत्फणोरुश्वसदतिधवळाहींद्रशंकां दधानः |
युष्माकं क्रमवक्त्रांबुरुहपरिलसत्कर्णिकाकारशोभः
शश्वत्त्राणाय भूयादलमतिविमलोत्तुंगकोणः स घोणः || 7 ||

क्रुध्यत्यद्धा ययोः स्वां तनुमतिलसतोर्बिंबितां लक्षयंती
भर्त्रे स्पर्धातिनिघ्ना मुहुरितरवधूशंकया शैलकन्या |
युष्मांस्तौ शश्वदुच्चैरबहुळदशमीशर्वरीशातिशुभ्रा-
-वव्यास्तां दिव्यसिंधोः कमितुरवनमल्लोकपालौ कपोलौ || 8 ||

यो भासा भात्युपांतस्थित इव निभृतं कौस्तुभो द्रष्टुमिच्छ-
-न्सोत्थस्नेहान्नितांतं गळगतगरळं पत्युरुच्चैः पशूनां |
प्रोद्यत्प्रेम्णा यमार्द्रा पिबति गिरिसुता संपदः सातिरेका
लोकाः शोणीकृतांता यदधरमहसा सोऽधरो वो विधत्तां || 9 ||

अत्यर्थं राजते या वदनशशधरादुद्गलच्चारुवाणी-
-पीयूषांभःप्रवाहप्रसरपरिलसत्फेनबिंद्वावळीव |
देयात्सा दंतपंक्तिश्चिरमिह दनुदायाददौवारिकस्य
द्युत्या दीप्तेंदुकुंदच्छविरमलतरप्रोन्नताग्रा मुदं वः || 10 ||

न्यक्कुर्वन्नुर्वराभृन्निभघनसमयोद्भुष्टमेघौघघोषं
स्फूर्जद्वार्ध्युत्थितोरुध्वनितमपि परब्रह्मभूतो गभीरः |
सुव्यक्तो व्यक्तमूर्तेः प्रकटितकरणः प्राणनाथस्य सत्याः
प्रीत्या वः संविदध्यात्फलविकलमलं जन्म नादः स नादः || 11 ||

भासा यस्य त्रिलोकी लसति परिलसत्फेनबिंद्वर्णवांत-
-र्व्यामग्नेवातिगौरस्तुलितसुरसरिद्वारिपूरप्रसारः |
पीनात्मा दंतभाभिर्भृशमहहहकारातिभीमः सदेष्टां
पुष्टां तुष्टिं कृषीष्ट स्फुटमिह भवतामट्टहासोऽष्टमूर्तेः || 12 ||

सद्योजाताख्यमाप्यं यदुविमलमुदग्वर्ति यद्वामदेवं
नाम्ना हेम्ना सदृक्षं जलदनिभमघोराह्वयं दक्षिणं यत् |
यद्बालार्कप्रभं तत्पुरुषनिगदितं पूर्वमीशानसंज्ञं
यद्दिव्यं तानि शंभोर्भवदभिलषितं पंच दद्युर्मुखानि || 13 ||

आत्मप्रेम्णो भवान्या स्वयमिव रचिताः सादरं सांवनन्या
मष्या तिस्रःसुनीलांजननिभगररेखाः समाभांति यस्यां |
अकल्पानल्पभासा भृशरुचिरतरा कंबुकल्पांबिकायाः
पत्युः सात्यंतमंतर्विलसतु सततं मंथरा कंधरा वः || 14 ||

वक्त्रेंदोर्दंतलक्ष्म्याश्चिरमधरमहाकौस्तुभस्याप्युपांते
सोत्थानां प्रार्थयन्यः स्थितिमचलभुवे वारयंत्यै निवेशं |
प्रायुंक्तेवाशिषो यः प्रतिपदममृतत्वे स्थितः कालशत्रोः
कालं कुर्वन्गळं वो हृदयमयमलं क्षाळयेत्कालकूटः || 15 ||

प्रौढप्रेमाकुलाया दृढतरपरिरंभेषु पर्वेंदुमुख्याः
पार्वत्याश्चारुचामीकरवलयपदैरंकितं कांतिशालि |
रंगन्नागांगदाढ्यं सततमविहितं कर्म निर्मूलयेत्त-
-द्दोर्मूलं निर्मलं यद्भृदि दुरितमपास्यार्जितं धूर्जटेर्वः || 16 ||

कंठाश्लेषार्थमाप्ता दिव इव कमितुः स्वर्गसिंधोः प्रवाहाः
क्रांत्यै संसारसिंधोः स्फटिकमणिमहासंक्रमाकारदीर्घाः |
तिर्यग्विष्कंभभूतास्त्रिभुवनवसतेर्भिन्नदैत्येभदेहा
बाहा वस्ता हरस्य द्रुतमिह निवहानंहसां संहरंतु || 17 ||

वक्षो दक्षद्विषोऽलं स्मरभरविनमद्दक्षजाक्षीणवक्षो-
-जांतर्निक्षिप्तशुंभन्मलयजमिळितोद्भासि भस्मोक्षितं यत् |
क्षिप्रं तद्भूक्षचक्षुः श्रुतिगणफणरत्नौघभाभीक्ष्णशोभं
युष्माकं शश्वदेनः स्फटिकमणिशिलामंडलाभं क्षिणोतु || 18 ||

मुक्तामुक्ते विचित्राकुलवलिलहरीजालशालिन्यवांच-
-न्नाभ्यावर्ते विलोलद्भुजगवरयुते कालशत्रोर्विशाले |
युष्मच्चित्तत्रिधामा प्रतिनवरुचिरे मंदिरे कांतिलक्ष्म्याः
शेतां शीतांशुगौरे चिरतरमुदरक्षीरसिंधौ सलीलं || 19 ||

वैयाघ्री यत्र कृत्तिः स्फुरति हिमगिरेर्विस्तृतोपत्यकांतः
सांद्रावश्यायमिश्रा परित इव वृता नीलजीमूतमाला |
आबद्धाहींद्रकांचीगुणमतिपृथुलं शैलजाक्रीडभूमि-
-स्तद्वो निःश्रेयसे स्याज्जघनमतिघनं बालशीतांशुमौळेः || 20 ||

पुष्टावष्टंभभूतौ पृथुतरजघनस्यापि नित्यं त्रिलोक्याः
सम्यग्वृत्तौ सुरेंद्रद्विरदवरकरोदारकांतिं दधानौ |
सारावूरू पुरारेः प्रसभमरिघटाघस्मरौ भस्मशुभ्रौ
भक्तैरत्यार्द्रचित्तैरधिकमवनतौ वांछितं वो विधत्तां || 21 ||

आनंदायेंदुकांतोपलरचितसमुद्गायिते ये मुनीनां
चित्तादर्शं निधातुं विदधति चरणे तांडवाकुंचनानि |
कांचीभोगींद्रमूर्ध्नां प्रतिमुहुरुपधानायमाने क्षणं ते
कांते स्तामंतकारेर्द्युतिविजितसुधाभानुनी जानुनी वः || 22 ||

मंजीरीभूतभोगिप्रवरगणफणामंडलांतर्नितांत-
-व्यादीर्घानर्घरत्नद्युतिकिसलयते स्तूयमाने द्युसद्भिः |
बिभ्रत्यौ विभ्रमं वः स्फटिकमणिबृहद्दंडवद्भासिते ये
जंघे शंखेंदुशुभ्रे भृशमिह भवतां मानसे शूलपाणेः || 23 ||

अस्तोकस्तोमशस्त्रैरपचितिममलां भूरिभावोपहारैः
कुर्वद्भिः सर्वदोच्चैः सततमभिवृतौ ब्रह्मविद्देवलाद्यैः |
सम्यक्संपूज्यमानाविह हृदि सरसीवानिशं युष्मदीये
शर्वस्य क्रीडतां तौ प्रपदवरबृहत्कच्छपावच्छभासौ || 24 ||

याः स्वस्यैकांशपातादतिबहलगलद्रक्तवक्त्रं प्रणुन्न-
-प्राणं प्राक्रोशयन्प्राङ्निजमचलवरं चालयंतं दशास्यं |
पादांगुल्यो दिशंतु द्रुतमयुगदृशः कल्मषप्लोषकल्याः
कळ्याणं फुल्लमाल्यप्रकरविलसिता वः प्रणद्धाहिवल्ल्यः || 25 ||

प्रह्वप्राचीनबर्हिःप्रमुखसुरवरप्रस्फुरन्मौळिसक्त-
-ज्यायोरत्नोत्करोस्रैरविरतममला भूरिनीराजिता या |
प्रोदग्राग्रा प्रदेयात्ततिरिव रुचिरा तारकाणां नितांतं
नीलग्रीवस्य पादांबुरुहविलसिता सा नखाळी सुखं वः || 26 ||

सत्याः सत्याननेंदावपि सविधगते ये विकासं दधाते
स्वांते स्वां ते लभंते श्रियमिह सरसीवामरा ये दधानाः |
लोलं लोलंबकानां कुलमिव सुधियां सेवते ये सदा स्तां
भूत्यै भूत्यैणपाणेर्विमलतररुचस्ते पदांभोरुहे वः || 27 ||

येषां रागादिदोषाक्षतमति यतयो यांति मुक्तिं प्रसादा-
-द्ये वा नम्रात्ममूर्तिद्युसदृषिपरिषन्मूर्ध्नि शेषायमाणाः |
श्रीकंठस्यारुणोद्यच्चरणसरसिजप्रोत्थितास्ते भावाख्या-
-त्पारावाराच्चिरं वो दुरितहतिकृतस्तारयेयुः परागाः || 28 ||

भूम्ना यस्यास्तसीम्ना भुवनमनुसृतं यत्परं धाम धाम्नां
साम्नामाम्नायतत्त्वं यदपि च परमं यद्गुणातीतमाद्यं |
यच्चांहोहन्निरीहं गहनमिति मुहुः प्राहुरुच्चैर्महांतो
माहेशं तन्महो मे महितमहरहर्मोहरोहं निहंतु || 29 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्री शिव केशादिपादांतवर्णन स्तोत्रं ||